# कूपमण्डूकः

एकः कूपः अस्ति। कूपे एकः मण्डूकानां कुटुम्बः निवसति। ते जनाः सर्वदा कूपे एव तिष्ठन्ति। कूपात् बहिः कुत्रापि न गच्छन्ति। अतः केवलं कूपस्य विषये एव तेषां जनानां ज्ञानम् अस्ति। कूपात् बहिः किं वर्तते एतस्य ज्ञानम् एव नास्ति।

तस्मिन् परिवारे एकः तरुणः मण्डूकः अपि अस्ति। तस्य स्वभावः जिज्ञासुः। कूपात् बहिः किम् अस्ति इति ज्ञातुं सः इच्छति। कौतूहलेन एकदा सः कूपात् बहिः उत्पतति। बहिः गत्वा सः अत्र तत्र भ्रमणं करोति। भ्रमणं कुर्वन् सः कस्यचन महासागरस्य तटम् आगच्छति। महासागरं दृष्ट्वा सः चमत्कृतः भवति। इयत् बृहत् जलराशिं सः पूर्वं कदापि न दृष्टवान् आसीत्।

आवेगेन धावन् सः कूपं प्रत्यागच्छति। उत्साहेन सर्वं वक्तुम् इच्छति। तस्य परिवारे एकः वृद्धः मण्डूकः अस्ति। सः वृद्धः पण्डितः, श्रेष्ठः अपि। 'सः सर्वज्ञः' इति मन्यते। तरुणः मण्डूकः तं द्रष्टुं गच्छति।

वृद्धः मण्डूकः तरुणं मण्डूकं पृच्छति "भवान् कुत्र गतवान् आसीत्? किं दृष्टवान्?" इति। तरुणः मण्डूकः वदति "अहो! अहम् अस्माकं कूपात् बहिः गतवान् आसम्। एकं बृहत् जलराशिं दृष्टवान्" इति। वृद्धः औत्सुक्येन पुनः पृच्छति "कियत् बृहत् जलराशिः भोः! अस्माकं कूपात् द्वेधा वा?" इति वदन् सः दीर्घश्वासं करोति। वायुपूर्णः फुल्लः भवति। तरुणं दर्शयित्वा पृच्छति "इयत् बृहत् वा?" तरुणः वदति "नैव भोः! इतोऽपि अधिकः बृहत् जलराशिः" इति।

सः वृद्धः इतोऽपि दीर्घश्वासं करोति। इतोऽपि वायुपूर्णः फुल्लः भवति। तरुणं दर्शयित्वा पृच्छति "इयत् बृहत् वा?" तरुणः पुनः "नैव भोः! इतोऽपि अधिकः बृहत् जलराशिः" इति वदति। इदानीं सः वृद्धः बृहत्परिमाणेन श्वसिति। अतिशयेन वायुं पूरयति। तरुणं दर्शयित्वा पुनः पृच्छति। किन्तु तरुणः मण्डूकः 'नैव नैव' इत्येव वदति।

एवं वारं वारं वायुं पूरयन् अन्ते वृद्धः मण्डूकः स्वयम् एव स्फुटितः भवति।

अभिप्रायः

भौतिक-विज्ञानशास्त्रस्य परिसीमा अस्ति। तस्य काचन मर्यादा अस्ति। ब्रह्माण्डस्य व्युत्पत्तिः कुतः? ईश्वरस्य स्वरूपः तस्य स्वभावः इत्यादिनः विषये उत्तरं दातुं तत् अशक्यम् अस्ति। यदि वयम् एतेषां प्रश्नानाम् उत्तरम् एतया वैज्ञानिकपद्धतिभिः प्राप्तुं प्रयत्नं कुर्मः चेत् वृद्धः मण्डूकः इव असफलताम् एव प्राप्नुमः।

-श्रीलप्रभुपादः

शब्दमञ्जूषा

कूपः = well, मण्डूकः = frog, वर्तते = to exist, तरुणः = young, उत्पतति = to jump, जलराशिः = water body, आवेगः = excitement, अस्माकम् = our, द्वेधा = twice, फुल्लः = puffed or inflated, स्फुटितः = burst.